শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ পঞ্চমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ পঞ্চমঃ সর্গঃ ॥

## দশরথপালিতাযা অযোধ্যাযা উৎকর্ষস্য ৱর্ণনম্

সর্ৱা পূর্ৱমিযং যেষামাসীৎ কৃৎস্না ৱসুন্ধরা।
প্রজাপতিমুপাদায নৃপাণাং জযশালিনাম্॥ **1.5.1** ॥

যেষাং স সগরো নাম সাগরো যেন খানিতঃ।
ষষ্টিপুত্রসহস্রাণি যং যান্তং পর্যৱারযন্॥ **1.5.2** ॥

ইক্ষ্ৱাকূণামিদং তেষাং রাজ্ঞাং ৱংশে মহাত্মনাম্।
মহদুৎপন্নমাখ্যানং রামাযণমিতি শ্রুতম্॥ **1.5.3** ॥

তদিদং ৱর্তযিষ্যাৱঃ সর্ৱং নিখিলমাদিতঃ।
ধর্মকামার্থসহিতং শ্রোতৱ্যমনসূযতা॥ **1.5.4** ॥

কোশলো নাম মুদিতঃ স্ফীতো জনপদো মহান্।
নিৱিষ্টঃ সরযূতীরে প্রভূতধনধান্যৱান্॥ **1.5.5** ॥

অযোধ্যা নাম নগরী তত্রাসীল্লোকৱিশ্রুতা।
মনুনা মানৱেন্দ্রেণ যা পুরী নির্মিতা স্ৱযম্॥ **1.5.6** ॥

আযতা দশ চ দ্বে চ যোজনানি মহাপুরী।
শ্রীমতী ত্রীণি ৱিস্তীর্ণা সুৱিভক্তমহাপথা॥ **1.5.7** ॥

রাজমার্গেণ মহতা সুৱিভক্তেন শোভিতা।
মুক্তপুষ্পাৱকীর্ণেন জলসিক্তেন নিত্যশঃ॥ **1.5.8** ॥

তাং তু রাজা দশরথো মহারাষ্ট্রৱিৱর্ধনঃ।
পুরীমাৱাসযামাস দিৱি দেৱপতির্যথা॥ **1.5.9** ॥

কপাটতোরণৱতীং সুৱিভক্তান্তরাপণাম্।
সর্ৱযন্ত্রাযুধৱতীমুষিতাং সর্ৱশিল্পিভিঃ॥ **1.5.10** ॥

সূতমাগধসম্বাধাং শ্রীমতীমতুলপ্রভাম্।
উচ্চাট্টালধ্ৱজৱতীং শতঘ্নীশতসঙ্কুলাম্॥ **1.5.11** ॥

ৱধূনাটকসঙ্ঘৈশ্চ সংযুক্তাং সর্ৱতঃ পুরীম্।
উদ্যানাম্রৱণোপেতাং মহতীং সালমেখলাম্॥ **1.5.12** ॥

দুর্গগম্ভীরপরিখাং দুর্গামন্যৈর্দুরাসদাম্।
ৱাজিৱারণসম্পূর্ণাং গোভিরুষ্ট্রৈঃ খরৈস্তথা॥ **1.5.13** ॥

সামন্তরাজসঙ্ঘৈশ্চ বলিকর্মভিরাৱৃতাম্।
নানাদেশনিৱাসৈশ্চ ৱণিগ্ভিরুপশোভিতাম্॥ **1.5.14** ॥

প্রাসাদৈ রত্নৱিকৃতৈঃ পর্ৱতৈরিৱ শোভিতাম্।
কূটাগারৈশ্চ সম্পূর্ণামিন্দ্রস্যেৱামরাৱতীম্॥ **1.5.15** ॥

চিত্রামষ্টাপদাকারাং ৱরনারীগণাযুতাম্।
সর্ৱরত্নসমাকীর্ণাং ৱিমানগৃহশোভিতাম্॥ **1.5.16** ॥

গৃহগাঢামৱিচ্ছিদ্রাং সমভূমৌ নিৱেশিতাম্।
শালিতণ্ডুলসম্পূর্ণামিক্ষুকাণ্ডরসোদকাম্॥ **1.5.17** ॥

দুন্দুভীভির্মৃদঙ্গৈশ্চ ৱীণাভিঃ পণৱৈস্তথা।
নাদিতাং ভৃশমত্যর্থং পৃথিৱ্যাং তামনুত্তমাম্॥ **1.5.18** ॥

ৱিমানমিৱ সিদ্ধানাং তপসাধিগতং দিৱি।
সুনিৱেশিতৱেশ্মান্তাং নরোত্তমসমাৱৃতাম্॥ **1.5.19** ॥

যে চ বাণৈর্ন ৱিধ্যন্তি ৱিৱিক্তমপরাপরম্।
শব্দৱেধ্যং চ ৱিততং লঘুহস্তা ৱিশারদাঃ॥ **1.5.20** ॥

সিংহৱ্যাঘ্রৱরাহাণাং মত্তানাং নদতাং ৱনে।
হন্তারো নিশিতৈঃ শস্ত্রৈর্বলাদ্ বাহুবলৈরপি॥ **1.5.21** ॥

তাদৃশানাং সহস্রৈস্তামভিপূর্ণাং মহারথৈঃ।
পুরীমাৱাসযামাস রাজা দশরথস্তদা॥ **1.5.22** ॥

তামগ্নিমদ্ভির্গুণৱদ্ভিরাৱৃতাং
দ্বিজোত্তমৈর্ৱেদষডঙ্গপারগৈঃ।
সহস্রদৈঃ সত্যরতৈর্মহাত্মভিঃ
মহর্ষিকল্পৈরৃষিভিশ্চ কেৱলৈঃ॥ **1.5.23** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে পঞ্চমঃ সর্গঃ ॥